श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

सरलकवि श्रीराघवाचार्य कृतं

# ॥ श्री महालक्ष्मी मङ्गळम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री महालक्ष्मी मङ्गळम् ॥

वेदान्तवेद्यविभवे विष्णुवक्षोविहारिणि।
अरविन्दाक्षदयिते लक्ष्म्यस्तु तव मङ्गळम् ॥ 1 ॥

सर्वमङ्गळमाङ्गळ्ये सर्वमङ्गळदेवते।
सर्वमङ्गळया स्तुत्ये लक्ष्म्यस्तु तव मङ्गळम् ॥ 2 ॥

पद्मसद्मे पद्महस्ते पद्मलोचनभामिनि।
पद्मभूपूजिते नित्यं लक्ष्म्यस्तु तव मङ्गळम् ॥ 3 ॥

इन्द्राणी मुख गीर्वाणी गणसेवा प्रहर्षिणि।
सर्वेषां जगतामम्ब लक्ष्म्यस्तु तव मङ्गळम् ॥ 4 ॥

त्वदिङ्गितपराधीनो हरिस्सर्वेश्वरोऽपि सन्।
कुरुते निखिलं कर्म लक्ष्म्यस्तु तव मङ्गळम् ॥ 5 ॥

इन्द्राय त्यक्तशापाय त्रैलोक्यैश्वर्यदायिनि।
अष्टभिर्मूर्तिभिर्जुष्टे लक्ष्म्यस्तु तव मङ्गळम् ॥ 6 ॥

सुपर्वभिस्सदाराध्ये शोभावति शुचिस्मिते।
सर्वकामप्रदे देवि लक्ष्म्यस्तु तव मङ्गळम् ॥ 7 ॥

शुभानि निजनामानि सदावर्तयतां सताम्।
मुदा श्रेयोविधायिन्या लक्ष्म्यस्तु तव मङ्गळम् ॥ 8 ॥

सतामात्महविस्त्यागक्रियोद्देश्यतया स्थिते।
कान्तेन हरिणा साकं लक्ष्म्यस्तु तव मङ्गळम् ॥ 9 ॥

स्वदृष्टिगोचरस्थानसिध्यत्संपत्समृद्धिके।
विलसत्सर्वकल्याणे लक्ष्म्यस्तु तव मङ्गळम्॥ 10॥

दिव्यं स्थानं परित्यज्य पत्या सह नमस्कृते।
ओंकारनगरीं प्राप्ते लक्ष्म्यस्तु तव मङ्गळम्॥ 11॥

यः पठेत्सन्ततं लक्ष्मीमङ्गळम् भक्तिमान् नरः।
स स्यात्तस्याः प्रसादेन सर्वमङ्गळभाजनम्॥ 12॥

॥ इति श्री महालक्ष्मी मङ्गळं समाप्तम्॥